अष्टादशः सर्गः

तथा विप्रेक्षमाणस्य वनं पुष्पितपादपम् |
विचिन्वतश्च वैदेहीं किं चिच्छेषा निशाभवत् || 5.18.1||

षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् |
शुश्राव ब्रह्मघोषान् स विरात्रे ब्रह्मरक्षसाम् || 5.18.2||

अथ मङ्गलवादित्रैः शब्दैः श्रोत्रमनोहरैः |
प्राबोध्यत महाबाहुर्दशग्रीवो महाबलः || 5.18.3||

विबुध्य तु महाभागो राक्षसेन्द्रः प्रतावपान् |
स्रस्तमाल्याम्बरधरो वैदेहीमन्वचिन्तयत् || 5.18.4||

भृशं नियुक्तस्तस्यां च मदनेन मदोत्कटः |
न तु तं राक्षसः कामं शशाकात्मनि गूहितुम् || 5.18.5||

स सर्वाभरणैर्युक्तो बिभ्रच्छ्रियमनुत्तमाम् |
तां नगैर्विविधैर्जुष्टां सर्वपुष्पफलोपगैः || 5.18.6||

वृतां पुष्करिणीभिश्च नानापुष्पोपशोभिताम् |
सदामत्तैश्च विहगैर्विचित्रां परमाद्भुतैः || 5.18.7||

ईहामृगैश्च विविधैर्वृतां दृष्टिमनोहरैः |
वीथीः सम्प्रेक्षमाणश्च मणिकाञ्चनतोरणाम् || 5.18.8||

नानामृगगणाकीर्णां फलैः प्रपतितैर्वृताम् |
अशोकवनिकामेव प्राविशत्सन्ततद्रुमाम् || 5.18.9||

अङ्गनाः शतमात्रं तु तं व्रजन्तमनुव्रजन् |
महेन्द्रमिव पौलस्त्यं देवगन्धर्वयोषितः || 5.18.10||

दीपिकाः काञ्चनीः काश्चिज्जगृहुस्तत्र योषितः |
वालव्यजनहस्ताश्च तालवृन्तानि चापराः || 5.18.11||

काञ्चनैश्चैव भृङ्गारैर्जह्रुः सलिलमग्रतः |
मण्डलाग्रा बृसीश्चैव गृह्यान्याः पृष्ठतो ययुः || 5.18.12||

काचिद्रत्नमयीं पात्रीं पूर्णां पानस्य भ्राजतीम् |
दक्षिणा दक्षिणेनैव तदा जग्राह पाणिना || 5.18.13||

राजहंसप्रतीकाशं छत्रं पूर्णशशिप्रभम् |
सौवर्णदण्डमपरा गृहीत्वा पृष्ठतो ययौ || 5.18.14||

निद्रामदपरीताक्ष्यो रावणस्योत्तमस्त्रियः |
अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव || 5.18.15||

व्याविद्धहारकेयूराः समामृदितवर्णकाः ।
समागलितकेशान्ताः सस्वेदवदनास्तथा ॥ 5.18.16||

घूर्णन्त्यो मदशेषेण निद्रया च शुभाननाः ।
स्वेदक्लिष्टाङ्गकुसुमाः समाल्याकुलमूर्धजाः ॥ 5.18.17||

प्रयान्तं नैर्ऋतपतिं नार्यो मदिरलोचनाः ।
बहुमानाच्च कामाच्च प्रियभार्यास्तमन्वयुः ॥ 5.18.18॥

स च कामपराधीनः पतिस्तासां महाबलः ।
सीतासक्तमना मन्दो मन्दाञ्चितगतिर्बभौ ॥ 5.18.19॥

ततः काञ्चीनिनादं च नूपुराणां च निःस्वनम् |
शुश्राव परमस्त्रीणां कपिर्मारुतनन्दनः || 5.18.20||

तं चाप्रतिमकर्माणमचिन्त्यबलपौरुषम् |
द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः || 5.18.21||

दीपिकाभिरनेकाभिः समन्तादवभासितम् |
गन्धतैलावसिक्ताभिर्ध्रियमाणाभिरग्रतः || 5.18.22||

कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणम् |
समक्षमिव कन्दर्पमपविद्धशरासनम् || 5.18.23||

मथितामृतफेनाभमरजोवस्त्रमुत्तमम् |
सपुष्पमवकर्षन्तं विमुक्तं सक्तमङ्गदे || 5.18.24||

तं पत्रविटपे लीनः पत्रपुष्पशतावृतः |
समीपमुपसङ्क्रान्तं विज्ञातुमुपचक्रमे || 5.18.25||

अवेक्षमाणस्तु तदा ददर्श कपिकुञ्जरः |
रूपयौवनसम्पन्ना रावणस्य वरस्त्रियः || 5.18.26||

ताभिः परिवृतो राजा सुरूपाभिर्महायशाः |
तन्मृगद्विजसङ्घुष्टं प्रविष्टः प्रमदावनम् || 5.18.27||

क्षीबो विचित्राभरणः शङ्कुकर्णो महाबलः |
तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः || 5.18.28||

वृतः परमनारीभिस्ताराभिरिव चन्द्रमाः |
तं ददर्श महातेजास्तेजोवन्तं महाकपिः || 5.18.29||

रावणोऽयं महाबाहुरिति सञ्चिन्त्य वानरः |

सोऽयमेव पुरा शेते पुरमध्ये गृहोत्तमे ।
अवप्लुतो महातेजा हनूमान्मारुतात्मजः || 5.18.30||

स तथाप्युग्रतेजाः स निर्धूतस्तस्य तेजसा |
पत्रे गुह्यान्तरे सक्तो मतिमान् संवृतोऽभवत् || 5.18.31||

स तामसितकेशान्तां सुश्रोणीं संहतस्तनीम् |
दिदृक्षुरसितापाङ्गीमुपावर्तत रावणः || 5.18.32||

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टादशः सर्गः ॥